# मोक्षदायिन्यः पुर्यः

आकाशशीटः*

अस्माकं भारतभूमिः पुण्यभूमिः। विविधतीर्थक्षेत्रसमन्विता महापुरुषाणामाविर्भावस्थलभूता च इयं भूमिः। अस्या भूमेः आध्यात्मिकवैभवं जगति सर्वत्र प्रसिद्धं वर्तते। भारतवर्षे स्थितेषु विविधतीर्थस्थानेषु सत्सु काश्चन पुर्यः विशेषतया परमपूताः उच्यन्ते। यासां दर्शनेन तत्रत्यतीर्थसेवनेन च मनुष्यकृतपापानि अपगच्छन्ति, चित्तशुद्धिः जायते, मोक्षप्राप्तिः च भवति इति विश्वासः वर्तते। एताः मोक्षदायिन्यः पुर्यः इति कथ्यते। गरुडपुराणस्य उत्तरखण्डे[१] स्कन्दपुराणे माहेश्वरखण्डे अरुणाचलमाहात्म्ये उत्तरार्धे काम्यकर्मवर्णने[२] एतद्विषये वर्णनं विद्यते। एकः प्रसिद्धः श्लोकः अस्ति। तदुच्यते—

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः॥ इति॥

अस्मिन् श्लोके अयोध्या, मथुरा, माया, काशी, काञ्ची, अवन्तिका द्वारावती चेत्येताः मोक्षदायिन्यः सप्तपुर्यः निर्दिश्यन्ते। अधुना क्रमेण एतासां किञ्चिद् विवरणम् उच्यते।

## अयोध्यापुरी

मोक्षदायिनीषु पुरीषु अन्यतमा इयं नगरी उत्तरप्रदेशराज्ये सरयूनद्याः तीरे

---

* चतुर्थवर्षीयच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य, बेलुडमठस्य।

१ अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
सम्प्राप्य म्रियते तीर्थे पुनर्जन्म न विद्यते॥ [उत्तरखण्डे २८.४]

२ अयोध्यां मथुरां मायां काशीं काचीमवंतिकाम्।
द्वारकां चारुणक्षेत्रमतिशेते न संशयः॥ [माहेश्वरखण्डे ७.५१]

विद्यमाना अस्ति। अयोध्या श्रीरामस्य जन्मभूमिः वर्तते। पुरणानुसारं भगवतः रामस्य स्मरणम्, पूजनम्, तीर्थस्नानादिकं च महत् पुण्यम् अस्ति। एतदाचरणेन मोक्षप्राप्तिः भवति इति विश्वासः वर्तते। प्रतिवर्षं रामनवमी, दीपोत्सवः अन्ये च धार्मिकोत्सवाः महता आडम्बरेण पाल्यन्ते। देशविदेशेभ्यः बहवः भक्तजनाः तत्र समवेताः भवन्ति। अत्र बहूनि दर्शनीयस्थानानि विद्यन्ते, तेषु राममन्दिरम्, नागेश्वरनाथमन्दिरम्, कनकभवनम्, हनुमानगढी इत्येतानि प्रसिद्धानि।

## मथुरापुरी

इयं पुरी उत्तरप्रदेशराज्ये यमुनानद्याः तटे राजते। अत्र श्रीकृष्णस्य जन्मभूमिः वर्तते। पुराणानुसारं श्रीकृष्णस्य दर्शनम्, पूजनम्, यमुनास्नानादिकं च क्रियते चेत् मनुष्यैः कृतानि पापानि दूरीभवन्ति। मोक्षमार्गे तेषां प्रवृत्तिः भवति। अत्र पुनः जन्माष्टमी, होली, दीपावली इत्यादयः उत्सवाः महोत्साहेन आचर्यन्ते। तत्र बहवः भक्ताः आगत्य योगदानं कुर्वन्ति। नैकेषु स्थानेषु सत्सु श्रीकृष्णमन्दिरम्, गोवर्धन-पर्वतः, प्रेममन्दिरम्, विश्रामघट्टः इत्यादीनि प्रसिद्धानि।

## मायापुरी

मोक्षदायिनीषु पुरीषु इयमपि अन्यतमा उच्यते। मायापुरी इति हरिद्वारनगर्याः प्राचीनं नाम वर्तते। उत्तराखण्डराज्ये गङ्गानद्याः तटे शोभते इयं नगरी। सनातनपरम्परानुसारं श्रद्धा अस्ति यत् गङ्गास्नानम्, देवपुजनम्, दानादिकं च मनुष्यस्य पापानि क्षालयन्ति, एवंविधम् अनुष्ठानं मोक्षप्राप्तौ सहायकं भवति। पुनः गङ्गामातुः सायंकालीनम् आरात्रिकवन्दनम् अत्यन्तं प्रसिद्धमस्ति। प्रतिदिनं सहस्रशः भक्तजनाः तद्दर्शनार्थम् आगच्छन्ति। अपि च अत्र द्वादशवर्षेभ्यः अनन्तरं महता वैभवेन कुम्भमेला आयोज्यते। तत्र स्नानार्थं बहूनां स्नानार्थिनां समारोहः दृश्यते। दर्शनीयतीर्थस्नानानि हि—हर-कि-पौरी,

मानसदेवीमन्दिरम, चण्डीदेवीमन्दिरम्, मायादेवीमन्दिरम् इत्यादीनि।

## काशीपुरी

भारतस्य प्राचीनतमासु नगरीषु अन्यतमा इयं पुरी। अस्याः अवस्थानम् उत्तरप्रदेशराज्ये वाराणस्यां गङ्गानद्याः तटे। अत्र काशीविश्वनाथमन्दिरं वर्तते। सनातनपरम्परानुसारं काश्यां मरणं प्राप्तस्य जीवस्य मोक्षप्राप्तिः भवति इति विश्वासः अस्ति। स्कन्दपुराणस्य काशीखण्डे अपि एतद्विषये विस्तृतं वर्णनं प्राप्यते। अतः नैके वयोवृद्धजनाः मरणात्पूर्वमेव तत्र वासार्थं गच्छन्ति। तेन इयं मोक्षदायिनी इत्युच्यते।

शिवस्य विशेषानुग्रहः अस्याः नगर्याः महत्त्वं वर्धयति। पुनः शास्त्रीयसङ्गीतस्य संस्कृतविद्यायाः च प्राचीना नगरी इत्यपि प्रसिद्धिः अस्ति। दर्शनीयक्षेत्राणि हि—काशीविश्वनाथमन्दिरम्, मणिकर्णिकाघट्टः, दशाश्वमेधघट्टः, कालभैरवमन्दिरम् इत्यादीनि।

## काञ्चीपुरी

सप्तसु मोक्षदायिनीषु पुरीषु इयमपि अन्यतमा वर्तते। एषा तमिलनाडुराज्ये काञ्चीपुरनगर्यां विराजते। अत्र विशेषः कः इत्युक्ते इयं सहस्रमन्दिराणां नगरी इत्युच्यते। अस्माकं हिन्दुपरम्परानुसारेण पुराणेषु येषां देवानाम् उल्लेखः प्राप्यते, तेषु प्रायः सर्वेषां मन्दिराणि अत्र विद्यमानानि सन्ति। अतः एतेषां दर्शनम्, तत्रत्यदेवानां पूजनम्, पुनः तत्र वासादिकं च क्रियते चेत् मोक्षप्राप्तिः भवतीति परम्परा वर्तते।

पुनः अस्यां नगर्यां शैव-वैष्णव-शाक्तसम्प्रदायानां समन्वयः दृश्यते। एषा नगरी प्राचीनविद्यायाः, संस्कृताध्ययनस्य दर्शनशास्त्रचर्चायाः च प्रमुखकेन्द्रम् अपि अस्ति। पुनः काञ्ची-कौशेयवस्त्राणि विश्वप्रसिद्धानि सन्ति। बहूनि दर्शनीयस्थानानि वर्तन्ते, तेषु प्रमुखानि हि—कामाक्षीमन्दिरम्,

एकाम्बरेश्वरमन्दिरम्, कैलासनाथमन्दिरम्, कामाक्षी-अम्मन्-मन्दिरम्, काञ्ची-कामकोटि-पीठम् इत्यादीनि।

## अवन्तिकापुरी

मोक्षदायिनी इयं पुरी मध्यप्रदेशराज्ये उज्जयिनीनगरे क्षिप्रानद्याः तीरे शोभते। प्राचीनकाले इयं संस्कृतेः, ज्योतिषशास्त्रस्य च प्रमुखकेन्द्रम् आसीद् इति श्रूयते। सनातनपरम्परानुसारम् अत्र श्रद्धया देवपूजा, पुण्यकर्म, पवित्रस्नानं च कुर्वतः जनस्य मोक्षप्राप्तिः भवतीति विश्वासः अस्ति। अतः एषा मोक्षदायिनी उच्यते। अत्र पुनः महाकालेश्वरज्योतिर्लिङ्गमन्दिरम् अस्ति यत् द्वादशज्योतिर्लिङ्गेषु अन्यतमम्। अपि च अत्र सान्दीपनि-आश्रमः वर्तते, यत्र श्रीकृष्णः बलरामश्च विद्याभ्यासं चक्रतुः इति श्रूयते। पुनः शिप्रानद्याः तटे सिंहस्थ-कुम्भमेला आयोज्यते। अत्र दर्शनीयस्थानानि हि—महाकालेश्वर-ज्योतिर्लिङ्गमन्दिरम्, कालभैरव मन्दिरम्, रामघट्टः, सान्दीपन्याश्रमः इत्यादीनि।

## द्वारावतीपुरी

उल्लिखितासु सप्तपुरीषु अन्तिमा पुरीयं द्वारावती। अस्याः अवस्थानम् अनद्यतने काले आरवसमुद्रतीरे द्वारकामण्डले। विशेषः कः इत्युक्ते द्वारावती भगवतः श्रीकृष्णस्य राजधानी आसीत्। पुराणानुसारं श्रीकृष्णः मथुरातः आगत्य समुद्रतीरे एतां नगरीं स्थापितवान्। यः श्रद्धया द्वारकाधीशस्य दर्शनं स्मरणं करिष्यति, तस्य अन्ते मोक्षप्राप्तिः भविष्यति। तेन इयं मोक्षदायिनी उच्यते। पुनः समुद्रगर्भे प्राचीनद्वारकायाः अवशेषांशाः अधुनाऽपि उपलभ्यन्ते। नैकेषु दर्शनीयस्थनेषु सत्सु प्रमुखानि हि—द्वारकाधीशमन्दिरम्, रुक्मिणीमन्दिरम्, नागेश्वर-ज्योतिर्लिङ्गमन्दिरम्, गोमतिघट्टः इत्यादीनि।

## उपसंहारः

एवम् एतासां सप्तपुरीणां माहात्म्यं पुराणेषु सम्यग्रुपेण प्रतिपादितम्

वर्तते। धर्मार्थकाममोक्षेषु चतुर्विधपुरुषार्थेषु मोक्षः परमपुरुषार्थ उच्यते। तत्प्राप्तये एव मनुष्याणां प्रवृत्तिः भवति। एताः नगर्यः न केवलं धार्मिकदृष्ट्या, अपितु सांस्कृतिकदृष्ट्या तथा ऐतिहासिकदृष्ट्यापि अत्यन्तं महत्वपूर्णाः सन्ति। अतः एतासां संरक्षणं संवर्धनं च सर्वेषां कर्तव्यं भवति। भारतीयसंस्कृतेः आध्यात्मिकवैभवस्य अमुल्याः प्रतीकाः सन्ति इमाः नगर्यः।